## विभाषाऽग्रेप्रथमपूर्वेषु । (२४/३३४५)

अप्राप्तविभाषेयम् । आभीक्ष्ण्ये इति नानुवर्तते । अग्रे प्रथम पूर्व इत्येतेषूपपदेषु समानकर्तृकयोः पूर्वकाले [1]धातोः क्त्वाणमुलौ प्रत्ययौ विभाषा भवतः । अग्रे भोजं व्रजति, अग्रे भुक्त्वा व्रजति । प्रथमं भोजं व्रजति, प्रथमं भुक्त्वा व्रजति । पूर्वं भोजं व्रजति, पूर्वं भुक्त्वा व्रजति । विभाषाग्रहणम् एताभ्यां मुक्ते लडादयोऽपि यथा स्युः[2] । अग्रे भुङ्क्ते ततो व्रजति । ननु च वासरूप इति भविष्यति ? क्त्वाणमुलौ यत्र सह विधीयेते तत्र वासरूप-विधिर्नास्ति इत्येतदनेन ज्ञाप्यते, तेन आभीक्ष्ण्ये लडादयो न भवन्ति । उपपदसमासः कस्मान् न [3]क्रियते ? उक्तं तत्रैवकारस्य प्रयोजनम्, अमैव यत्तुल्यविधानमुपपदं तत् समस्यते, नान्यत् (२. २. २०/७८३) इति ॥

## कर्मण्याक्रोशे कृञः खमुञ् । (२५/३३४६)

कर्मण्युपपदे [4]कृञो धातोः खमुञ् प्रत्ययो भवति आक्रोशे गम्यमाने । चोरंकारमाक्रोशति[5] । चोरोऽसि, दस्युरसि [6]इत्याक्रोशति । [7]चोरकरणमाक्रोशसम्पादनार्थमेव, न त्वसौ चोरः क्रियते ॥

## स्वादुमि णमुल् । (२६/३३४७)

समानकर्तृकयोः पूर्वकाले कृञः इति चानुवर्तते । स्वादुमि इत्यर्थग्रहणम् । स्वाद्वर्थेषूपपदेषु [8]कृञो णमुल् प्रत्ययो भवति । स्वादुङ्कारं भुङ्क्ते । सम्पन्नङ्कारं भुङ्क्ते । लवणङ्कारम् । स्वादुमि इति [9]मकारान्तनिपातनम् [10]ईकाराभावार्थम्, [11]च्व्यन्तस्यापि[12] मकारार्थं [13]दीर्घाभावार्थं च (म.भा. २.३४७) । अस्वाद्वीं स्वाद्वीं कृत्वा[14] भुङ्क्ते स्वादुङ्कारं भुङ्क्ते । वासरूपेण क्त्वा अपि भवति, स्वादुं कृत्वा भुङ्क्ते । तुमर्थाधिकाराच्च सर्व एते भावे प्रत्ययाः । यद्येवम्, स्वादुङ्कारं भुङ्क्ते देवदत्तः (म.भा. २. ३४८) इति णमुला कर्तुरनभिहितत्वात् कर्तरि कस्मात् तृतीया न भवति ? भुजिप्रत्ययेनाभिहितः कर्ता[15], न चास्मिन् प्रकरणे [16]शक्तिशक्तिमतोर्भेदो विवक्ष्यते, समानकर्तृकत्वं [17]हि विरुध्यते । प्रधानशक्त्यभिधाने वा [18]गुणशक्तिरभिहितवत् प्रकाशते ॥

## अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् । (२७/३३४८)

कृञः इत्येव[19] । अन्यथादिषूपपदेषु [20]कृञो णमुल् प्रत्ययो भवति, सिद्धाप्रयोगश्चेत् [21]करोतेर्भवति । कथं पुनरसौ सिद्धाप्रयोगः ? निरर्थकत्वान्न प्रयोगमर्हति [22]इति एवमेव प्रयुज्यते । अन्यथा भुङ्क्ते इति यावानर्थस्तावानेव अन्यथाकारं भुङ्क्ते इति[23] गम्यते । [24]अन्यथाकारं भुङ्क्ते । एवङ्कारं भुङ्क्ते । कथङ्कारं भुङ्क्ते । इत्थंकारं भुङ्क्ते । सिद्धाप्रयोगः इति किम् ? अन्यथा कृत्वा शिरो भुङ्क्ते[25] ॥

---

1. धातोः नास्ति ब. 2. इति इत्यधिकम् ह. 3. भवति ब, क्रियेत ह. 4. करोतेः ब. फ. ह. 5. दस्युङ्कारमाक्रोशति इत्यधिकम् ब. फ. ह. 6. इत्येवम् ब. फ. ह. 7. चोरकरणमिह ब. फ. ह. 8. करोतेः ह. 9. मान्त फ. 10. ईत्वाभावार्थम् ब. 11. द्व्यन्तस्य च ब. 12. च इत्यधिकम् ब. 13. दीर्घाभावार्थं नास्ति ब, द्व्यन्तस्य चमत्कारार्थं च फ. 14. यवागुं तु इत्यधिकम् अ. ब. फ. ह. 15. इति इत्यधिकम् फ. ह. 16. शक्ति नास्ति फ, शक्तिमतोः नास्ति क. 17. हि नास्ति फ, विरुध्येत ह. 18. गुणक्रियाशक्तिः ह. 19. वर्तते इत्यधिकम् फ. 20. करोतेः फ, करोतेः धातोः ह. 21. करोतिः ह. 22. इति नास्ति फ. 23. एवकारे इत्यधिकम् फ. 24. उदाहरणमिदं नास्ति फ. 25. वासरूपेण क्त्वा अपि भवति । अन्यथा कृत्वा चोदितः, अन्यथा कृत्वा परिहृत इत्येवमादिः इत्यधिकम् ह.